**ब्र(व्र)ह्मज्ञ** त्रि० ब्रह्म जानाति ज्ञा—क । १ब्रह्मवेत्तरि २विष्णौ पु० “ब्रह्मज्ञो ब्राह्मणप्रियः” विष्णुस० । [राजनि०

**ब्र(व्र)ह्मजटा** स्त्री ब्रह्मणो जटेव संहतत्वात् । दमनकवृक्षे

**ब्र(व्र)ह्मजा(या)मल** न० यामलभेदे तन्त्रे ।

**ब्र(व्र)ह्मजिज्ञासा** स्त्री ६त० । ब्रह्मावगतिफलके विचारे । शारीरकभाष्ये १सूत्रे तत्राधिकार्य्यादिकं दृश्यम् ।

**ब्र(व्र)ह्मजीविन्** पु० ब्रह्म वेदस्तद्विहितेन श्रौतकर्म्मणा जीवति जीव—णिनि । दक्षिणार्थं परकीयश्रौतादिकर्म्मकारके

**ब्र(व्र)ह्मज्ञान** न० ब्रह्मणो ज्ञानं तेन सह आत्माभेदज्ञानम् । ब्रह्मविद्यायां तच्च अहं ब्रह्मास्मीत्येवंरूपम् “आत्मानं चेत् विजानीयादयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय किमर्थमनुसंज्वरेत्” श्रुत्या तदभेदज्ञानस्यैव मोक्षहेतुत्वमुक्तं “वेदान्तशास्त्रसिद्धान्तब्रह्मज्ञानं वदाम्यहम् । अहंब्रह्म परं ज्योतिः विष्णुरित्येव चिन्तयेत् । सूर्य्ये हृद्व्योम्नि वह्नौ च ज्योतिरेकं त्रिधा स्थितम् । यथा सर्पिः शरीरस्थं गवां न कुरुते बलम् । निर्गतं कर्म्मसंयुक्तं दत्ते तासां महाबलम् । तथा विष्णुः शरीरस्थो न करोति हितं नृणाम् । विनाऽऽराधनया देवः सर्वगः परमेश्वरः । आरुरुक्षुयतीनाञ्च कर्म्मज्ञानमुदाहृतम् । आरूढयोगवृक्षाणां ज्ञानं योगः परं मतम्” गरुड़पु० २४० अ० । न्यायादिमते तच्चारोपज्ञानं वेदान्तिमते प्रमारूपम् । तत्त्वमसि अहंब्रह्मास्मीत्यादिवाक्यजन्यमपि तज्ज्ञानं मननिदिध्यासनादिना पश्चात् प्रत्यक्षमुत्पद्यते । तज्ज्ञानाभिलापादिकं विवेकचू० दर्शितं यथा “अव्यक्तादिस्थूलपर्य्यन्तमेतद्विश्वं यत्राभासमात्रं प्रतीतम् । व्योमप्रख्यं सूक्ष्ममाद्यन्तहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि । सर्वाधारं सर्ववस्तुप्रकाशं सर्वाकारं सर्वगं सर्वशून्यम् । नित्यं शुद्धं निश्चलं निर्विकल्पं ब्रह्माद्वैतं यत् तदेवाहमस्मि । यन्निरस्ताशेषमायाविशेषं प्रत्यग्रूपं प्रत्ययागम्यमानम् । सत्यज्ञानानन्दमानन्दरूपं ब्रह्माद्वैतं यत् तदेवाहमस्मि । निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः । निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः । सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः । केवलाखण्डबोधोऽहमानन्दोऽहं निरन्तरम्” ।

**ब्र(व्र)ह्मणस्पति** पु० ६त० । अलुक्स० निपातौ तस्य पदरूपत्वोक्तेः एकपदत्वम् । १ब्राह्मणजातिस्वामिनि यजु० ३४।२८ । २मन्त्रस्वामिनि च “पवित्रं विततं ब्रह्मणस्पते !! ताण्ड्य० १।२।८ । “हे ब्रह्मणस्पते ! मन्त्रस्वामिन्” भा०

**ब्र(व्र)ह्मण्य** पु० ब्रह्मणे हितः । १विष्णौ “ब्रह्मण्यो देवकीपुत्रः” विष्णुसं० । २ब्राह्मणहितमात्रे त्रि० ३ब्रह्मदारुवृक्षे पु० अमरः । ४मुञ्जतृणे ५तालवृक्षे राजनि० । ६शनैश्चरे ७ब्रह्मणि तपसि साधौ त्रि० मेदि० ।

**ब्र(व्र)ह्मतीर्थ** ६त० । १पुष्करमूले राजनि० २पुष्करतीर्थे च । ३तीर्थभेदे यत्र स्नाने “तत्र वर्णावरः स्नात्वा ब्राह्मण्यं लभते नरः । ब्राह्मणश्च विशुद्धात्मा गच्छेत परमां गतिम्” भा० व० ८३अ० । फलमुक्तम् ।

**ब्र(व्र)ह्मत्व** न० ब्रह्मणो भावः त्व । १ऋत्विग्विशेषस्य ब्रह्मणो धर्मे २शुद्धतुरीयब्रह्मभावे च ।

**ब्र(व्र)ह्मतुङ्ग** पु० कालपर्वतभेदे । “स्निग्धाञ्जनचयाकारं संप्राप्तः कालपर्वतम् । ब्रह्मतुङ्गं नदीश्चान्यास्तथा जनपदानपि” भा० द्रो० ८अ० ।

**ब्र(व्र)ह्मद** पु० ब्रह्म वेदं ददाति । उपनीय वेददातरि आचार्य्ये “उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता” मनुः दा—क्विप् ब्रह्मदात् तत्रार्थे पु० ।

**ब्र(व्र)ह्मदण्ड** पु० ब्रह्मणो दण्डः । १ब्राह्मणदण्डे २अभिशापरूपे दण्डे “ब्रह्मदण्डहता ये च विद्युदग्निहताश्च ये” ति० त० षोड़शीश्राद्धमन्त्रः । ३वसिष्ठब्रह्मयष्टिरूपे दण्डे च । “धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं परम् । एकेन ब्रह्मदण्डेन बहवो नाशिता मम” रामा० अयो० विश्वामित्रवाक्यम् । ४ब्राह्मणयष्टिवृक्षे शब्दच० । ५विप्रस्य यष्टौ च । ६केतुभेदे वृ०स० ११अ० । केतुशब्दे दृश्यम् ।

**ब्र(व्र)ह्मदण्डी** स्त्री क्षुद्रो दण्डः ङीप् ब्रह्मोपपन्नाङ्गं दण्डी । क्षुद्रक्षुपभेदे कण्टकपत्रफलायामजगण्ड्यां राजनि० ।

**ब्र(व्र)ह्मदत्त** इक्ष्वाकुवंश्ये नृपभेदे ३त० । २हिरण्यगर्भेण दत्ते त्रि० ४त० । ३विप्राय दत्ते त्रि० । ४शुकदेवस्य कन्यायां कृत्वीसमाख्यायां अणुहस्य पुत्रभेदे पु० तत्कथा हरिवं० ११ अ० दृश्या । [याम् अमरः ।

**ब्र(व्र)ह्मदर्भा** स्त्री ब्रह्मणा दर्भो गन्धमस्याः । यमानिका-

**ब्र(व्र)ह्मदाय** पु० ब्र(व्र)ह्म ण(णे) वा वेदाध्ययनसमाप्तौ, विप्राय वा राज्ञा दीयते दा—कर्म्मणि घञ् । समावृत्त० विप्राय देये धने “ब्र(व्र)ह्मदायागतां भूमिं हरेयुर्ब्राह्मणीसुताः” दायभागधृतस्मृतिः । [वृक्षभेदे अमरः ।

**ब्र(व्र)ह्मदारु** पु० ब्रह्मणो विप्रस्य हितः दारुः । अश्वत्थाकारे

**ब्र(व्र)ह्मद्विष्** त्रि० ब्रह्मणे वेदाय विप्राय द्वेष्टि द्विष—क्विप् । १वेदविप्रयोर्द्वेष्टरि २वेदनिन्दके च मनुः ३।१५ ।